.

# ALL KERALA COMMON MODEL EXAMINATION

## Class 10 - संस्कृत (शेमुषी)

**निर्धारित समय: 3 hours** **अधिकतम अंक: 80**

**सामान्य निर्देश:**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
2. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
   ‘क’ खण्ड : अपठितावबोधनम् - 10 अङ्का:
   'ख' खण्ड : रचनात्मककार्यम् - 15 अङ्का:
   ‘ग' खण्ड : अनुप्रयुक्तव्याकरणम् - 25 अङ्का:
   'घ' खण्ड : पठितावबोधनम् - 30 अङ्का:
3. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
4. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्क: अवश्यं लेखनीयः
5. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
6. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
7. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

### 'क' खण्डः अपठितावबोधनम्

1. **अधोलिखितं अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् संस्कृतेन उत्तरत। (10)** **[10]**

दीपावली प्राचीनतमं पर्व। अस्मिन् दिने सर्वाधिकम् आकर्षकं मनोरञ्जञ्च भवति स्फोटकानाम् आस्फोटनम्। विचित्राणि वर्णयुक्तानि स्फोटकानि आकाशे भूमौ च विविधरूपाणि दर्शयन्ति। जनाः तानि दृष्ट्वा तुष्यन्ति। परन्तु अति सर्वत्र वर्जयेत्। रात्रौ आस्फोटकानां शब्दः कर्णौ बधिरीकरोति वायुमण्डलं च दूषयति। पूर्वं जनसंख्या सीमिता आसीत्। वृक्षाः वायुं शुद्धं कुर्वन्ति स्म। इदानीम् जनसंख्या प्रवृद्धा, वृक्षसंख्या क्षीणा। विस्फोटकेभ्यः निर्गतः धूमः रुग्णान् पीडयति, नवजातशिशुभ्यः हानिकरः सिध्यति। दीपावली-समये शरदि आकाशः निर्मलः भवति। सर्वत्र पवित्रता विराजते। अतः वयम् आनन्देन दीपावलीम् मानयेम, वसुन्धरां भूषितां कुर्याम न तु दूषिताम्। सर्वेषां जीवन सुखमयं भवेत्। किं तेन उत्सवेन यः कस्मैचित् अपि कष्टकरः भवेत्? ‘मा कश्चिद् दुःखभाग भवेत्' इति अस्माकम् आदर्शः।

I. **एकपदेन उत्तरत- (1×2=2)**

i. केषाम् आस्फोटनम् सर्वेभ्यः आकर्षकम् मनोरञ्जकम् च?

ii. दीपावली कस्यां ऋतौ भवति?

II. **पूर्णवाक्येन उत्तरत- (2×2=4)**

i. अस्माकं कः आदर्शः?

ii. स्फोटकानां धूमः कान् पीडयति?

III. **भाषिककार्यम्- (1×3=3)**

i. ‘प्रवृद्धा' इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(क) क्षीणा

(ख) निर्गतः

(ग) दूषिता

(घ) निर्मला

ii. 'सर्वत्र पवित्रता विराजते' अत्र किं अव्ययपदम्?

(क) पवित्रता

(ख) विराज

(ग) विराजते

(घ) सर्वत्र

iii. 'पर्व' इत्यस्य किं विशेषणम् अत्र प्रयुक्तम्?

(क) सर्वाधिकं

(ख) प्राचीनतमम्

(ग) प्राचीनं

(घ) पूर्वम्

IV. **अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत। (1×1=1)**

## 'ख' खण्ड: रचनात्मकं कार्यम्

2. **विद्यालयस्य प्रधानाचार्यां प्रति लिखिते शुल्कक्षमाप्रार्थनापत्रे मञ्जूषायाः समुचितपदैः रिक्तस्थानानि पूरयत-** **[5]**

परीक्षाभवनात्

आदरणीयाः (i)_________

**विषय-** शुल्कक्षमापनार्थं निवेदनम्

(ii)_________

(iii)_________ निवेदनम् अस्ति यत् मम पिता एकस्मिन् सर्वकारविद्यालये (iv)_________ अस्ति। तस्य मासिकं (v)_________ द्विसहस्र रूप्यकाणि अस्ति। अस्माकं परिवारे (vi)_________ सन्ति। अस्मिन् सीमिते वर्तने विद्यालयस्य (vii)_________ अतीव कठिनम् अस्ति। कृपया तदर्थं (viii)_________ प्रदाय (ix)_________ माम् अनुगृह्णन्तु।

(x)_________

भवदीया

आज्ञाकारिणी शिष्या

क, ख, ग

तिथि : 24-7-20....

| |
|---|
| **मञ्जूषा-** सधन्यवादम्, भवत्यः, शिक्षाशुल्क प्रदानम्, वर्तनम्, लिपिकः, महोदयाः, प्रधानाचार्याः सदस्याः, सविनयम्, स्वीकृतिम् |

3. **चित्रम् दृष्ट्वा मञ्जूषा-सहायतया संस्कृते पञ्चवाक्यानि लिखत। (5)** **[5]**



**मञ्जूषा-** भवने प्रीतिभोजः, जनाः पङ्क्तिद्वये, अनेके, भोजनं कुर्वन्ति, एकः परिवेशयति, सर्वेषाम् अग्रे, स्थाल्यः, मग्नाः, जनद्वयम् भोजनम् आनयतः, पृष्ठे, एकः वृक्षः, हरिते पट्टे उपविष्टाः।

4. **अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत - (केवलं वाक्यपञ्चकम्)** **[5]**

(a) देवता पवित्र स्थानों पर निवास करते हैं। **[1]**

The deities reside in holy places.

(b) राजा प्रजा का हितैषी होता है। **[1]**

The king is well wisher of the citizens.

(c) मन सत्य से शुद्ध होता है। **[1]**

The mind is purified by truth.

(d) रमा कल कोलकाता जायेगी। **[1]**

Rama will go to Kolkata tomorrow.

(e) समय पर सुपाच्य भोजन ही खाना चाहिए। **[1]**

Eat only well-digested food at the right time.

(f) तुम सब गेंद से खेलते हो। **[1]**

You all play with the ball.

(g) वे सब क्या करते हैं? **[1]**

What do they all do?

**'ग' खण्डः अनुप्रयुक्तव्याकरणम्**

5. **अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत- (केवलं प्रश्नचतुष्टयम्)** **[4]**

(a) अस्ति <u>देउलाख्यः + ग्रामः</u>। **[1]**

(b) राज्ञः स्वेषु <u>गात्रेष्वपि</u> निरासक्तिं विज्ञाय ब्रह्माण्डं व्याकुलम् अभवत्। **[1]**

(c) मम <u>बहूनि + अपत्यानि</u> सन्ति। **[1]**

(d) कश्चन **[1]**

(e) बुद्धिर्बलवती **[1]**

6. **अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्)** **[4]**

(a) मुनिः राजानं <u>इष्टम् अनतिक्रम्य</u> अभ्यनन्दत्। **[1]**

क) यथेष्टम्　　　　ख) यथाष्टम् जया

ग) यथोष्टम्　　　　घ) यथष्टम् योगा

(b) <u>राजहंसेन</u> या शोभा सरसो भवेत्। **[1]**

क) राज्ञः हंसः तेन　　　　ख) राज्ञोः हंसेन

ग) राज्ञे हंसेन न　　　　घ) राजनि हंसेन

(c) भोजनसमये तौ <u>पाणी च पादौ च</u> प्रक्षालयतः। **[1]**

क) पाणिपादम्　　　　ख) पाणिपादौ

ग) पाणीपादौ　　　　घ) पाणिपादः

(d) <u>अर्थकार्श्येन</u> पीडितः पदातिरेव प्राचलत्। **[1]**

क) अर्थात् कार्येन　　　　ख) अर्थाय कार्येन

ग) अर्थस्य कार्येन　　　　घ) अर्थेन कार्येन

(e) <u>विनयशीलः</u> बुद्धः तथागतः कथ्यते। **[1]**

क) विनयेन शीलः　　　　ख) विनय एव शीलः

ग) विनयम् शीलम् यस्य सः　　　　घ) विनयस्य शीलः

7. **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्)** **[4]**

(a) मुनिभिः तपः <u>करणीयम्</u>। **[1]**

क) कृ + अनीयम्　　　　ख) कृ + अनीयत्

ग) कृ + अनीयर्　　　　घ) कृ + अनीय

(b) अस्ति ते कौशलं शालिप्रस्थेनानेन सम्पन्नमाहारम् आस्मान् <u>भोजयितुम्</u>। **[1]**

क) भोजय + तुमुन　　　　ख) भोजय + तुमुं

ग) भोजय् + तुमुन्　　　　घ) भोज्य + तुमुन

(c) रामानन्दः एकः श्रेष्ठः <u>धर्म + ठक्</u> अस्ति। **[1]**

क) धार्मिकः　　　　ख) धर्मिक

ग) धर्मठिकः　　　　घ) धर्मिकम्

(d) राजसभायाम् <u>मन्त्र + इन्</u> भाषयन्तिः। **[1]**

क) मन्त्रि　　　　ख) मन्त्री

ग) मन्त्रिन्　　　　घ) मन्त्रिणः

(e) अस्माभिः लता <u>आरोपयितव्याः</u>। **[1]**

क) आरोग् + तव्यः　　　　ख) आरोप + तव्याः

ग) आ + रोप् + तव्यत्　　　　घ) आरुप् + तव्याः

8. **वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत (केवलं प्रश्नत्रयम्)** **[3]**

(a) त्वम् कथां शृणोषि। **[1]**
त्वया ________ श्रूयते।

क) कथाः　　　　ख) कथाम्

ग) कथा　　　　घ) कथया

(b) अस्माभिः पयः ________ [1]

क) पीयते ख) पिबति

ग) पीयन्ते घ) पिबन्ति

(c) ________ पुत्राय बाल्ये महत् विद्याधनं यच्छति। [1]

क) पितरः ख) पितरम्

ग) पिता घ) पित्रा

(d) सः दीन इति जानन्नपि सः कृषकः ________ पीडयति। [1]

क) सः ख) तम्

ग) ताः घ) तेन

9. **अधोलिखितदिनचर्यायां रिक्तस्थानानि कालबोधकशब्दैः पूरयत। (केवलं प्रश्न चतुष्टयम्) (1×4=4)** [4]

i. उमा प्रातः 8:30 ________ वादने गृहकार्यं करोति।
ii. सुनीलः प्रातः 6:15 ________ वादने जागर्ति।
iii. अनिलः सायं 5:00 ________ वादने उद्याने क्रीडति।
iv. सा प्रातः 7:30 ________ वादने पूजां करोति।
v. कमला रात्रौ 9:45 ________वादने स्वपिति।

10. **मञ्जूषायां प्रदत्तैः अव्ययैः सहायतयां वाक्यानां रिक्तस्थानानि पूरयत। (½×6=3)** [3]

**मञ्जूषा-** तत्र, बहिः, वृथा, ह्यः, उपरि, यदा-कदा, अपि

i. विद्यालये ________ वनमहोत्सवः मान्यते।
ii. छात्रैः गृहेभ्यः _______ एकः पादपः आनीतः।
iii. छात्रैः आनीतेषु पादपेषु फलिनः वृक्षाः विद्यालयात् _________ रोपणीयाः।
iv. _______ एकं विशालं भवनम् अस्ति।
v. _______ एकः जलाशयः आसीत्।
vi. त्वम् ________ पठ।
vii. दिने कृता दया ________ न भवति।

11. **अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत - (केवलं प्रश्नत्रयम्)** [3]

(a) तेषु <u>अनेकाः</u> उपरि गच्छन्ति स्म। [1]

क) अनेके ख) अनेकम्

ग) अनेकान् घ) अनेकः

(b) भवान् <u>पठसि-लिखसि</u> च। [1]

क) पठावः-लिखावः ख) पठामि-लिखामि

ग) पठताम्-लिखताम् घ) पठति-लिखति

(c) धनस्य <u>उपभोगाः</u> जनहिताय भवेत्। [1]

क) उपयोगम् ख) उपयोगः

ग) उपयोगे घ) उपयोगान्

(d) गु<u>रवः</u> छात्रेभ्यः विद्यां ददाति। [1]

क) गुरुः ख) गुरुणा

ग) गुरुम् घ) गुरु

## 'घ' खण्डः पठितावबोधनम्

12. **अधोलिखितान गद्यान्शान् पठित्वा प्रदत्त प्रश्नान् संस्कृतेन उत्तरत-** **[5]**

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुध्दिमती पुत्रव्दयोपेता पितुर्गृहं प्रति चलिता।

मार्गे गहनकानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रमागच्छन्तं दृष्टवा धाष्टर्यात् पुत्रौ चपेटया प्रहृत्य जगाद -" कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः?

अयमेकस्तावद्विभज्य भुज्यताम्। पश्चाद् अनयो द्वितीयः कश्चिल्लक्ष्यते।"

इति श्रुत्वा व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलचित्तो नष्टः।

**प्रश्ना:**

I. **एकपदेन उत्तरत-**

i. तत्र कः नाम राजपुत्र वसति स्म?

ii. बुद्धिमति कया पुत्रौ प्रहृतवती?

II. **पूर्णवाक्येन उत्तर-**

i. बुद्धिमती आगच्छन्तं व्याघ्रं दृष्टवा पुत्रौ किं जगाद?

III. "वनम्, पत्नी" इति पदस्य पर्यायपदं किम् प्रयुक्तम्?

13. **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।** **[5]**

कञ्चित् कालं नय मामस्मान्नगराद् बहुदूरम्।

प्रपश्यामि ग्रामान्ते निर्झर-नदी-पयःपूरम्।।

एकान्ते कान्तारे क्षणमपि मे स्यात् सञ्चरणम्।

I. **एकपदेन उत्तरत-**

i. माम् कस्मात् बहुदूरं नय?

ii. कुत्र क्षणमपि मे सञ्चरणम् स्यात्?

II. **पूर्णवाक्येन उत्तरत-**

i. अहं (कविः) ग्रामान्ते किं प्रपश्यामि?

III. **भाषिककार्यम्-**

i. 'ग्रामादौ' इति पदस्य विलोमपदं किं प्रयुक्तम्?

(क) ग्रामान्ते

(ख) ग्राममध्ये

(ग) अन्ते

ii. 'अहम्' इति कर्तृपदस्य क्रियापदं किं प्रयुक्तम्?

(क) पश्यामि

(ख) प्रपश्यामि

(ग) प्रपश्यापि

iii. 'अरण्ये' इति पदस्य पर्यायपदं किं प्रयुक्तम्?

(क) नदी

(ख) कान्तारे

(ग) एकान्ते

14. **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।** **[5]**

**सर्वे पक्षिणः** - (उच्चैः)-आम् आम्- कश्चित् खगः एव वनराजः भविष्यति इति। (परं कश्चिदपि खगः आत्मानं विना नान्यं कमपि अस्मै पदाय योग्यं चिन्तयन्ति तर्हि कथं निर्णयः भवेत् तदा तैः सर्वैः गहननिद्रायां निश्चिन्तं स्वपन्तम् उलूकं वीक्ष्य विचारितम् यदेषः आत्मश्लाघाहीनः पदनिर्लिप्तः उलूको एवास्माकं राजा भविष्यति। परस्परमादिशन्ति च तदानीयन्तां नृपाभिषेकसम्बन्धिनः सम्भाराः

इति।)

सर्वे पक्षिणः सञ्जायै गन्तुमिच्छन्ति तर्हि अनायास एव-

काकः - (अट्टाहसपूर्णेन-स्वेरण)-सर्वथा अयुक्तमेतत् यन्मयूर-हंस-कोकिल चक्रवाक-शुक-सारसादिषु पक्षिप्रधानेषु विद्यमानेषु दिवान्धस्यास्य करालवक्त्रस्याभिषेकार्थं सर्वे सज्जाः। पूर्ण दिनं यावत् निद्रायमाणः एष कथमस्मान् रक्षिष्यति। वस्तुतस्तु

स्वभावरौद्रमत्युग्रं क्रूरमप्रियवादिनम्।

उलूकं नृपतिं कृत्वा का नु सिद्धिर्भविष्यति।।

I. **एकपदेन उत्तरत-**

i. कः एव वनराजः भविष्यति?

ii. तैः सर्वैः कं वीक्ष्य विचारितम्?

II. **पूर्णवाक्येन उत्तरत-**

i. पक्षिभिः किं विचारितम्?

III. **भाषिककार्यम्-**

i. 'विचारयन्ति' इत्यर्थे अत्र किं पदं प्रयुक्तम्?

(क) चिन्तयन्ति

(ख) भविष्यति

(ग) निश्चिन्तम्

ii. 'सामग्र्यः' इति पदस्य पर्यायपदं किं प्रयुक्तम्?

(क) भाराः

(ख) सम्भाराः

(ग) सम्बन्धिनः

iii. 'भविष्यति' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम्?

(क) उलूकः

(ख) अस्माकम्

(ग) राजा

15. **रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नचतुष्टयम्)** **[4]**

(a) शिशुजनः <u>वयोऽनुरोधातत्</u> लालनीय एव। **[1]**

(b) यः <u>वित्रस्तान्</u> न रक्षति? **[1]**

(c) <u>यामानां</u> पक्तयः अनन्ताः कठिनं संसरणम् भवति। **[1]**

(d) धैर्यवान् <u>लोके</u> परिभवं न प्राप्नोति। **[1]**

(e) अहो! <u>हृदयग्राही</u> स्पर्शः **[1]**

16. **अधोलिखित श्लोकानाम् भावर्थम् मञ्जूषायाः सहायतया उचित-क्रमेण पूरयत्।** **[4]**

भवति शिशुजनो वयोऽनुरोधाद्

गुणमहतामपि लालनीय एव।

व्रजति हिमकरोऽपि बालभावात्

पशुपति-मस्तक-केतकच्छदत्वम्।।

**भावः**-बालकः स्व स्वाभावात् (i)________ जनैः अपि तथैव (ii)________ भवति, यथा केतकी (iii)________ इव चन्द्रः बालभावत्वेन भगवतः शिवस्य (iv)________ चुड़ामणि इव शोभते।

| |
|---|
| **मञ्जूषा-** शेखर, लालनीयः, वयोवृद्धैः, पुष्पाणि |

अथवा

**अधोलिखित श्लोकानाम् भावर्थम् मञ्जूषायाः सहायतया उचित-क्रमेण पूरयत्।**

अपत्येषु च सर्वेषु जननी तुल्यवत्सला।

पुत्रे दीने तु सा माता कृपार्द्रहृद्रया भवेत्।।

**भावार्थः-** अस्य भावोऽस्ति यत् माता तु स्व (i)________ सन्तानेषु समान प्रेमवती भवति तथापि स्व (ii)________ पुत्रे तु (iii)________ हृदयम् अतीव (iv)________ भवति।

| **मञ्जूषा-** दीने, तस्याः, दयायुक्तं, सर्वेषु |
|---|

17. **अधोलिखितानि वाक्यानि घटनाक्रमानुसारेण योजयत-** **[4]**

i. कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्।

ii. सर्वेषु अपत्येषु जननी तुल्यवत्सला भवति।

iii. सः बलीवर्दः क्षेत्रे अपतत्।

iv. तथापि दुर्बले सुते मातुः अभ्यधिका कृपा सहजैव।

v. कृषकः वृषभौ नीत्वा गृहम् आगच्छत्।

vi. एकः शरीरेण दुर्बलः जवेन गन्तुम् अशक्तः च आसीत्।

vii. सर्वत्र जलोपप्लवः सञ्जातः।

viii. एतत् दृष्ट्वा माता सुरभिः रोदितुम् आरब्धा।

18. **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत- (केवलं प्रश्नत्रयम्)** **[3]**

(a) यानानां पङ्क्तयो ह्यनन्ताः, कठिनं <u>संसरणम्</u>। **[1]**

क) अनन्ताः        ख) यानानाम्

ग) शरणं        घ) संचलनम्

(b) अवक्रता यथाचित्ते तथा <u>वाचि</u> भवेत्। **[1]**

क) मनसि        ख) शरीरे

ग) मुखे        घ) वाण्याम्

(c) शीघ्रमेव गजस्यापि पुच्छं <u>विधूय</u> वृक्षोपरि आरोहति। **[1]**

क) मित्रः        ख) सागरे

ग) मस्तके        घ) आकृष्य

(d) व्यायामस्विन्न<u>गात्र</u>स्य पद्भ्यामुद्वर्तितं व नरम्। **[1]**

क) शरीरम्        ख) गोत्रः

ग) आभा        घ) गायः